दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-318

1

सितम्बर 07, 2026

Website- www.himsanskritam.com

Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णौकादशी
भाद्रपद 22 प्रविष्टांशः मङ्गलमयः भवेत्


2 बैडमिण्टन्-प्रतिस्पर्धायाम् 'चाइना-मास्टर्स' पुरुष-युगल-प्रतियोगितायाः चषकं भारतस्य सात्विकसाईराज-रङ्कीरेड्डी-चिराग-शेट्टी-युगलेन विजितम्

4 बिहार- भवन-उपविधि- २०२६ प्रारूपे मन्त्रिसमूहस्य उपवेशनम्

7 भाद्रपदमासस्य परिवर्तिनी एकादशी


# भारतस्य आर्थिक-शक्तिः नीति-गतिशीलता च देशं 'विकसित भारतस्य' लक्ष्यं प्रति नयतः, भारतीय-प्रतिष्ठानानि जागतिक स्तरे नेतृत्वं कुर्युः - प्रधानमन्त्री



नवदेहल्यां 'श्रीराम-कॉलेज ऑफ कॉमर्स' महाविद्यालयस्य शत वर्षे सम्पूर्णे सति आयोजिते शताब्दी समारोहे प्रधानमन्त्री मोदी मुख्य अभ्यागतः आसीत् । तेन 'जेन-जी' युवा-उद्यमिनः प्रोत्साहयितुम् 'उच्च-लक्ष्य-धारणस्य' मन्त्रो दत्तः। तेन प्रोदीरितं यत् भारतीय-मेधा जागतिक व्यापार-जगत् नूतनां दिशं दर्शयति, ए.आई.-प्रौद्योगिक्याः उपयोगेन च देशः आर्थिक समृद्धिं प्राप्नोति । आर्थिक-दृढतां प्रतिपादयन् प्रधानमन्त्री अवदत् यत् पश्चिम एशिया-सङ्कटावधौ अपि भारतेन सप्त दशांश अष्ट प्रतिशतम् यावत् अभूतपूर्व-संवृद्धि-मानमर्जितम्। अनेन भारतस्य आन्तरिक शक्तेः परिचयः लभ्यते।

आत्मनिर्भर-भारतस्य दिशि 'मेक्-इन्-इण्डिया' अभियानम् अभूतपूर्व परिवर्तनं साधयति - प्रधानमन्त्री ।

तेन प्रख्यापितं यत् वैश्विक सङ्कटेषु भारतस्य दृढ-नीति-सञ्चालनम् अद्य जागतिक-स्तरे श्लाघनीयं वर्तते। आत्मनिर्भर-भारतस्य दिशि 'मेक्-इन्-इण्डिया' अभियानम् अभूतपूर्व परिवर्तनं साधयति इति प्रधानमन्त्री अवदत् । अनेन अभियानेन भारतम् अद्य प्रमुख-निर्यातक-राष्ट्रमभवत्। असौ न्यगादीत् यत् स्मार्टफोन्-क्षेत्रे सार्धद्विलक्ष कोटि रूप्यकाणाम् निर्यातं सम्प्राप्तम्, रक्षा-उत्पादने च द्विलक्ष कोटि रूप्यकाणाम् नूतन-कीर्तिमानम् स्थापितम्। रक्षा-निर्यातं च षट्-शत-कोटिभ्यः वर्धित्वा चत्वारिंशत् सहस्र-कोटि-रूप्यकाणि अभवत् ।

## अद्यतनीयं सुभाषितम्

**औषधेष्वपि सर्वेषु हास्यं श्रेष्ठ वदन्ति ह।**
**स्वाधीनं सुलभं चापि आरोग्यानन्दवर्धनम्।।**

भावार्थः- सभी औषधियों में निश्चय ही हंसना सबसे श्रेष्ठ औषधि है क्योंकि यह अपने वश में है, सुलभ है व स्वास्थ्य और आनन्द की वृद्धि करती है।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा




## नवदेहल्यां सत्यनिकेतन-क्षेत्रे एकं पञ्च-स्तरीयं भवनं ध्वस्तम् अभवत्

नवदेहल्याम् महती दुर्घटना अभवत्, यत्र सत्यनिकेतन-क्षेत्रे एकं पञ्च-स्तरीयं भवनं ध्वस्तम् अभवत्। सूचनां प्राप्य देहली अग्निशमनदलेन अष्टादश-वाहनानि प्रेष्य आपद् उद्धार कार्यम् आरब्धम्। ततः एव चतुः जनाः उद्धृत्य चिकित्सालयम् प्रति नीताः, तेषु एकः मृत्युमुपगतः अन्ये च गभीरावस्थायां सन्ति। उपराज्यपालः तरञ्जीत सिंह-सन्धुः मुख्यमन्त्री रेखा गुप्ता च पीडितानां साहाय्याय त्वरित-निर्देशान् अयच्छताम्। सहैव सुरक्षा-दृष्ट्या पार्श्वस्थम् एकम् अपरं भवनमपि रिक्तं कारितम् ।




## ऊनत्रिंशदधिक-द्विसहस्रतमवर्षं यावत् भारतं मादकद्रव्य-मुक्तं विधातुम् एका त्रि-वार्षिकी मार्गदर्शिका प्रस्तुता

केन्द्रीय गृहमन्त्री अमितशाहः गोआ राज्ये वार्ताहरसम्मेलने ऊनत्रिंशदधिकद्विसहस्रतम वर्षं यावत् भारतं मादकद्रव्य-मुक्तं कर्तुं रूपरेखां प्राकटयत्। तेन मादकपदार्थ-विरोधि-त्रि-वार्षिक राष्ट्रिय-अभियानस्य आह्वानं कृतम्। गृह-मन्त्रिणा संसूचितं यत् प्रशासनेन शत मादक-सञ्चालानि खण्डयितुम्, शत अपराधिनः भारतम् आनेतुम्, तथा शत अवैधिक-प्रयोगशालाः विनष्टं कर्तुम् उच्च-लक्ष्यं निर्धारितम् ।



## संयुक्तराष्ट्र-संसदि 'समान-क्षेत्रफल-मानचित्र प्रस्तावस्य' भारतेन कृतं समर्थनम्

भारतस्य भौगोलिक अखण्डतां संप्रभुताञ्च रेखाङ्कयन् विदेश मन्त्रालयः संयुक्त-राष्ट्रस्य मानचित्र प्रस्तावे स्व-पक्षम् उपस्थापितवान्। मन्त्रालयस्य प्रवेक्त्रा रणधीर-जैसवालेन प्रोक्तं यत् भारतेन यु.एन. प्रस्तावस्य समर्थनं कुर्वता स्पष्टं कृतं यत् भारतस्य राष्ट्रिय-सीमासु किमपि भ्रामकं प्रदर्शनं असह्यम् अस्ति । तेन प्रोक्तं यत् अयं प्रस्तावः कस्यापि देशस्य सीमायाः अनुमोदनं न करोति, अपि तु केवलं समान-क्षेत्रफल-प्रदर्शनस्य नीतिं पोषयति ।

संप्रभुता-प्रादेशिक अखण्डतयोः अक्षुण्णताम् रेखाङ्कयन् भारतेन प्रोक्तं यत् जम्मू-कश्मीर-लद्दाख समेत्य-समस्त क्षेत्रस्य प्रदर्शनं केवलम् आधिकारिक-मानचित्रानुसारम् एव स्वीकार्यम्।

## मध्यप्रदेशस्य सागर-मण्डले संदिग्ध-विषाक्त मद्यपानेन दश जनाः मृत्युमुपगताः, पंचत्रिंशत् जनाः चिकित्सालयेषु प्रवेशिताः, कतिपय संदिग्धाः आरक्षिदलेन गृहीताः




सागर-मण्डले विषाक्त मद्य-पानेन भीषण-त्रासदी संजाता, यत्र दश जनाः स्वप्राणान् अयच्छन्। पंचत्रिंशत् जनाः चिकित्सालयेषु नीताः, येषु केषाञ्चन अवस्था गभीरा वर्तते। गम्भीर-रुग्णाः बुन्देलखण्ड-वैद्यकीय महाविद्यालयं तथा सागर-मण्डल-चिकित्सालयं प्रति स्थानान्तरिताः सन्ति। एषा घटना बण्डा-आरक्षि-स्थानक-क्षेत्रस्य 'नौराजा' तथा 'घुघरा खुर्द' इति ग्रामयोः संजाता। समाहर्ती अवदत् यत् शव-परीक्षणस्य प्राथमिक निष्कर्षे मिथैल् ऐल्कोहॉल् इति विषाक्त-रसायनस्य सेवनस्य सम्भावना प्रतीयते। घटना सम्बन्धे बण्डा-थाना क्षेत्रात् केचन संदिग्धाः गृहीताः सन्ति ।

## नवदेहल्यां ब्रिक्स-सम्मेलनस्य सुरक्षा-समीक्षायै देहली-आरक्षि-दलेन वाहन-व्यूह-पूर्वाभ्यासः सञ्चालितः




ब्रिक्स्-शिखर सम्मेलनस्य आतिथ्यं कर्तुं राष्ट्र-राजधानी नवदेहली पूर्ण-सज्जतां भजते। सितम्बर-मासस्य द्वादश त्रयोदश दिनाङ्कयोः 'भारत-मण्डपम्' इत्यत्र आयोज्यमानस्य अस्य बृहत् सम्मेलनस्य सुरक्षा-समीक्षायै देहली-आरक्षि-दलेन वाहन-व्यूह-पूर्वाभ्यासः सञ्चालितः । सम्मेलने विश्व-नेतारः ब्रिक्स्-देशानां प्रमुखाश्च भागं ग्रहीष्यन्ति।

## उपराष्ट्रपतिः गुवाहाट्यां गीतानगर-महाविद्यालयस्य पंचाशत्-तमे वार्षिकोत्सवे मुख्य अभ्यागतः आसीत्

आसाम-प्रवासे सम्प्राप्तः उपराष्ट्रपतिः सी. पी. राधाकृष्णन् गुवाहाट्यां गीतानगर-महाविद्यालयस्य पंचाशत्-तमे वार्षिकोत्सवे मुख्य अभ्यागतः आसीत् । तेन छात्रान् सम्बोध्य गुणवत्तापूर्वकं शिक्षायै अनुसन्धानाय च बलम् दत्तम्। उपराष्ट्रपतिना उच्च शिक्षायां महिलानां सहभागिता 'नारी शक्तेः' प्रतीकमिति अभिहितम्

## बैडमिण्टन्-प्रतिस्पर्धायाम् 'चाइना-मास्टर्स' पुरुष-युगल-प्रतियोगितायाः चषकं भारतस्य सात्विकसाईराज-रङ्कीरेड्डी-चिराग-शेट्टी-युगलेन विजितम्




बैडमिण्टन्-क्रीडायां शेन्जेन नगरे चाईना-मास्टर्स-स्पर्धायाः पुरुषयुगलक्रीडायां सात्विकसाईराज् रङ्किरेड्डी तथा चिराग् शेट्टी इत्येतयोः भारतीययुगलेन उपाधिः विजितः। चीन देशस्य ही-जी-टिङ्ग तथा रेन्-जियाङ्ग-यू इत्युभयोः युगलं एकादश-एकविंशति, एकविंशति-त्रयोदश, एकविंशति-सप्तदश अंकैः पराजित्य प्रथमवारं स्वर्णपदकं प्राप्तवन्तौ ।

# देहलीं गतः मुख्यमन्त्री; कार्य-सूच्यां त्रयः प्रमुखाः विषयाः केन्द्रीयमन्त्रिभिः भविष्यति चर्चा

## वन-भूमि-आबंटनं, विपाशानद्याः उत्खननं, 'जलजीवन- अभियानस्य' लम्बितावशिष्टराशेः प्राप्तिश्च भविष्यन्ति चर्चिताः

हिमसंस्कृतवार्ताः- शिमला।
मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः रविवासरे पुनरेकवारं देहलीं गतः। अस्मिन् वारे अष्टम-नवम- सितम्बरदिनाङ्कयोः सः भारत-सर्वकारस्य त्रिषु मन्त्रालयेषु राज्यस्य विषयान् उत्थापयिष्यति। अस्मिन् काले मुख्यमन्त्रिणः त्रिभिः केन्द्रीयमन्त्रिभिः सह मेलनं भविष्यति। एतेषु मार्ग-परिवहन- राजमार्गमन्त्री नितिन गडकरी, वन-पर्यावरणमन्त्री भूपेन्द्रयादवः, जलशक्तिमन्त्री सी. आर. पाटिल-महोदयश्च सम्मिलिताः सन्ति। मुख्यमन्त्रिणः सुक्खू-महोदयस्य कार्यसूच्याम् अस्मिन्क्रमे भारत-सर्वकारस्य समक्षम् उत्थापयितुं त्रयः प्रमुखाः विषयाः सन्ति। प्रथमः विषयः वनभूमेः रूपान्तरणस्य वर्तते, येन आपदा-प्रभावितानां पुनर्वसनाय एतस्याः भूमेः आवण्टनं कर्तुं शक्येत। एषः विषयः वनमन्त्रालयस्य अधिकारक्षेत्रान्तर्गतः अस्ति। द्वितीयः विषयः कुल्लू-मनालीक्षेत्रयोः विपाशानद्याः उत्खननं संबन्धी वर्तते। नद्यां सञ्चितानां खनिजानाम् अवकराणां च निष्कासनम् अनिवार्यं सञ्जातम्, यतोहि अनेन जल-स्तरः उपरि गच्छति; किन्तु वन-संरक्षण-अधिनियमस्य कारणात् एतत् सम्भवं न भवति। अस्मात् पूर्वं मुख्यमन्त्रिणा दृश्य- श्रव्य-माध्यमेन अपि भारतसर्वकारेण सह आयोजिते उपवेशने भागः गृहीतः आसीत्, यस्मिन् एते त्रयः केन्द्रीयमन्त्रिणः संलग्नाः आसन्। तस्मिन्नेव उपवेशने निश्चितम् अभवत् यत् मुख्यमन्त्री स्वयमेव देहलीं गत्वा स्वपक्षं स्थापयिष्यति। अत एव अयं देहली-प्रवासः आयोजितः। तृतीयः विषयः जलशक्तिविभागे 'जलजीवन- अभियानस्य' लम्बितावशिष्ट-राशेः प्रतिप्राप्तेः वर्तते। जल-संसाधन-मन्त्रालयेन सह अन्येषु अपि विषयेषु मुख्यमन्त्री वार्तां कर्तुं शक्नोति। मुख्यमन्त्री ह्यः एव देहलीतः प्रत्यागतः आसीत्, किन्तु तत् उपवेशनं काङ्ग्रेस- उच्च- नेतृत्व- सम्बद्धम् आसीत्। तत्र मन्त्रिमण्डलविस्तारं काङ्ग्रेससङ्घटने सम्भाविताः नियुक्तीश्च अधिकृत्य लोकसभायाः विपक्षनेत्रा राहुलगान्धी-महोदयेन, एआईसीसी- अध्यक्षेण मल्लिकार्जुन- खडगे महोदयेन च सह मुख्यमन्त्रिणः मन्त्रणा जाता आसीत्।

## ऊनामण्डले 'चिट्टा' मादक-द्रव्य-विरोधिनी पदयात्रा

मुख्यमन्त्रिणः देहली-प्रवासकाले नवम- सितम्बर-दिनाङ्कात् परं दशम-सितम्बर-दिनाङ्के ऊनानगरे 'चिट्टाविरोधी-पदयात्रायाः' आयोजनं भविष्यति, यदर्थं मुख्यमन्त्री ऊनां गमिष्यति। सः साक्षात् देहलीतः अपि ऊनां प्राप्तुं शक्नोति। पूर्वम् इदम् आयोजनं सप्तम-सितम्बरदिनाङ्के निर्धारितम् आसीत्, किन्तु देहली-प्रवासकारणात् तत् स्थगितं कृत्वा दश-सितम्बरदिनाङ्काय निश्चितं कृतम्। अस्मात् परम् एतादृशः कार्यक्रमः मण्डी-मण्डलेऽपि आयोजयिष्यते।

## ११ सितम्बरदिनाङ्के भविष्यति सुक्खू- मन्त्रिमण्डलस्य उपवेशनम्; बहुविभागानां प्रस्तावेषु लप्स्यते अनुमोदनम्

हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेश-सर्वकारेण आगामि- मन्त्रिमण्डल-उपवेशनस्य तिथिः निर्धारिता। मुख्यमन्त्रिणः ठाकुर- सुखविन्दरसिंहसुक्खू- महोदयस्य अध्यक्षतायां ११ सितम्बरदिनाङ्के राज्यसचिवालये मन्त्रिमण्डलस्य उपवेशनं भविष्यति। इदम् उपवेशनं प्रातः एकादश-वादनात् (११:००) परं प्रस्तावितं वर्तते। सर्वकारस्य अस्मिन् उपवेशने विविधविभागेभ्यः सम्बद्धानां बहूनां महत्त्वपूर्णानां प्रस्तावानाम् उपरि विचारविमर्शस्य सम्भावना वर्तते। मन्त्रिमण्डल-उपवेशनाय सम्बद्धविभागेभ्यः कार्यसूचिकाः समाहूताः सन्ति। एतेषु शिक्षा-स्वास्थ्य- सहिताः बहवः अन्य-विभागानां विषयाः समाविष्टाः सन्ति इति ज्ञायते। विभागानां पक्षतः प्रेषितेषु प्रस्तावेषु मन्त्रिमण्डलं विचारविमर्शं कृत्वा आवश्यकाम् अनुज्ञां निर्णयं वा स्वीकरिष्यति।

**रिक्तपदेषु अपि दृष्टिः-**
उपवेशने सर्वकारीय-विभागेषु रिक्तानां पदानां पूरणसम्बद्धेषु विषयेषु अपि चर्चा भवितुं शक्नोति। विविधविभागेषु कर्मचारिणां न्यूनतां विचार्य रिक्तपदानां पूरणसम्बद्धाः प्रस्तावाः मन्त्रिमण्डलस्य समक्षम् आगन्तुं शक्नुवन्ति। एतादृश्याम् अवस्थायां ११ सितम्बरदिनाङ्कस्य इदम् उपवेशनं सर्वकारीयसेवाभ्यः विभागीयकार्यप्रणाल्याश्च दृष्ट्या महत्त्वपूर्णं मन्यते।

# कर्कट-रोगस्य (Cancer) उपचाराय सज्जीभविष्यन्ति विशेषज्ञ-प्राविधिक-वृत्तिमन्तः; आईजीएमसी-टाण्डा-संस्थानयोः प्रारप्स्यते नूतनः पाठ्यक्रमः



**हिमसंस्कृतवार्ता — शिमला।** हिमाचलप्रदेशे स्वास्थ्य-शिक्षां चिकित्सा-सेवाश्च सुदृढीकर्तुं राज्य-सर्वकारेण महत्त्वपूर्णः निर्णयः स्वीकृतः। इन्दिरागान्धी-आयुर्विज्ञान-महाविद्यालये (IGMC) शिमलायां तथा च डॉ. राजेन्द्रप्रसाद-राजकीय-आयुर्विज्ञान-महाविद्यालये टाण्डायाम् अधुना 'विकिरण-चिकित्सा-प्रौद्योगिकी-स्नातकः' (Bachelor of Radiation Therapy Technology) इति नूतन-पाठ्यक्रमः प्रारप्स्यते। उभयोः संस्थानयोः २०२६-२७ शैक्षणिक-सत्रात् अस्याम् उपविद्यायां प्रतिवर्षं त्रिंशत्-त्रिंशत् (३०-३०) छात्रेभ्यः प्रवेशः प्रदास्यते।

विकिरण-चिकित्सा कर्कट-रोगस्य उपचारस्य एकः महत्त्वपूर्णः भागः वर्तते। एतादृश्यां स्थितौ अस्मिन् क्षेत्रे प्रशिक्षितानां प्राविधिक-वृत्तिमत्-जनानां (Technical Professionals) निर्माणात् प्रदेशस्य चिकित्सालयेषु विशेषज्ञ-सेवानां सुदृढीकरणस्य आशा वर्तते। सर्वकारस्य कथनम् अस्ति यत् नूतन-पाठ्यक्रमाणां विस्तारेण छात्रेभ्यः स्व-राज्ये एव आधुनिक-चिकित्सा-क्षेत्रेषु प्रशिक्षण-प्राप्तेः अवसरः लप्स्यते, एतदर्थं च तैः अन्य-राज्यानि प्रति न गन्तव्यं भविष्यति।

### हमीरपुर-मण्डले ३३० आसनानां 'एलाइड हेल्थकेयर' महाविद्यालयः

राज्य-सर्वकारेण हमीरपुरे 'एलाइड-एण्ड-हेल्थकेयर' इति महाविद्यालयस्य स्थापनायाः अपि निर्णयः स्वीकृतः। अस्मिन् संस्थाने विविधानां व्यावसायिक-पाठ्यक्रमाणां कुलम् ३३० आसनानि भविष्यन्ति। एतेषु बीएससी-प्रयोगशाला-विज्ञानं, बीएससी-रेडियोलॉजी, बीएससी-एनेस्थीसिया, बीएससी-ऑप्टोमेट्री, बीएससी-फिजियोथेरेपी इत्येतेषां प्रत्येकस्य षष्टिः-षष्टिः (६०-६०) आसनानि समाविष्टानि सन्ति। एतदतिरिक्तं 'डायलिसिस-तन्त्रज्ञस्य' (Dialysis Technician) कृते ३० आसनानि भविष्यन्ति। महाविद्यालयस्य सुचारु-सञ्चालनाय आवश्यक-यन्त्राणाम् उपकरणानां च क्रयणार्थं सर्वकारेण ६.८७ कोटि-रूप्यकाणां राशिः प्रसारिता। अस्य मुख्यम् उद्देश्यं प्रदेशे स्वास्थ्य-सहयोगि-क्षेत्राय प्रशिक्षित-मानव-संसाधनानां निर्माणं करणीयम् अस्ति।

# ४४ मेधाविनः अभियान्त्रिकी-छात्राः जापानं प्रस्थिताः; मुख्यमन्त्री सुक्खू-महोदयः अवदत् — प्रचुरं शिक्षित्वा प्रत्यागच्छन्तु



**हिमसंस्कृतवार्ता — शिमला।** हिमाचलप्रदेशस्य चतुश्चत्वारिंशत् (४४) मेधाविनः बी.टेक-विद्यार्थिनः जापान-देशस्य तन्त्रज्ञानं, शिक्षां, प्रौद्योगिक-कार्य-संस्कृतिं च समीपतया अवगन्तुम् अवसरं लप्स्यन्ते। मुख्यमन्त्री सुखविन्दरसिंहसुक्खु-महोदयः रविवासरे आभासीय-माध्यमेन छात्रान् जापानस्य 'अन्ताराष्ट्रिय-शैक्षणिक-भ्रमणम्-२०२६' इत्यस्मै प्रस्थापयत्, तेभ्यः शुभकामनाः च प्रददात्। प्राविधिक-शिक्षा-विभागस्य पक्षतः आयोजिता इयं 'शैक्षणिक-अवलोकन-यात्रा' ६ तः १२ सितम्बर २०२६ पर्यन्तं प्रवर्तिष्यते।

अस्मिन् दले प्रदेशस्य विविधानाम् अभियान्त्रिकी-महाविद्यालयानां चतुर्विंशतिः (२४) छात्राः विंशतिः (२०) विद्यार्थिन्यश्च समाविष्टाः सन्ति। छात्राणां चयनं पूर्णतया योग्यता-आधारेण कृतम् अस्ति। प्राविधिक-शिक्षा-मन्त्री राजेशधर्माणी न्यवेदयत् यत् प्रदेशस्य पञ्चभ्यः अभियान्त्रिकी-महाविद्यालयेभ्यः अस्य शैक्षणिक-भ्रमणस्य कृते प्रायः पञ्चाशताधिकं षट्शतं (६५०) आवेदनानि प्राप्तानि आसन्।

### अन्तरिक्ष-केन्द्रे रोबोटिक्स-शालायां च ज्ञास्यन्ति नूतनं तन्त्रज्ञानम्

जापान-प्रवास-काले विद्यार्थिनः तत्रत्यानां प्रमुखाणां शैक्षणिक-, अनुसन्धान-, औद्योगिक-प्रतिष्ठानानां च भ्रमणं करिष्यन्ति। एतेषु टोक्यो-मेट्रोपोलिटन्-विश्वविद्यालयः, 'जाक्सा' (JAXA) त्सुकुबा-अन्तरिक्ष-केन्द्रं, साइबरडाइन्-रोबोटिक्स्-शाला, जेएएल (JAL) एयरोस्पेस-यन्त्रागारः, क्योसेरा-यन्त्रागारः तथा ओसाका-नगरस्य विविधाः उद्योगाः समाविष्टाः सन्ति।

अस्मिन् काले छात्रेभ्यः अन्तरिक्ष-प्रौद्योगिकी, रोबोटिक्स, एयरोस्पेस, उन्नत-निर्माण-प्रक्रिया, नवाचारः, आधुनिक-यातायात-प्रणाली चेत्यादीनां विस्तृत-ज्ञानं लप्स्यते। सहैव ते जापान-देशस्य कार्य-संस्कृतिम्, अनुशासनं, सामाजिक-मूल्यानि, प्राविधिक-पारिस्थितिक-तन्त्रं चापि सूक्ष्मदृष्ट्या अवगमिष्यन्ति।

### आईटीआई-अनन्तरं बी.टेक-विद्यार्थिभ्यः प्राप्तम् अन्ताराष्ट्रियम् अवलोकनम्

प्राविधिक-शिक्षा-विभागस्य पक्षतः इदं द्वितीयम् अन्ताराष्ट्रियम् अवलोकन-भ्रमणम् अस्ति। अस्मात् पूर्वम् आईटीआई-छात्रेभ्यः कजाकिस्तान-देशस्य यात्रा आयोजिता आसीत्। अधुना एतामेव योजनाम् अग्रे सारयन् सर्वकारः बी.टेक-सङ्कायस्य मेधावि-विद्यार्थिनः वैश्विक-स्तरस्य शिक्षया तन्त्रज्ञानेन च संयोजयति।

मुख्यमन्त्री सुक्खू-महोदयः प्रोक्तवान् यत् राज्य-सर्वकारः छात्रान् नूतन-तन्त्रज्ञानेन, नवाचारैः, वैश्विक-कार्य-प्रणालीभिः सह संयोजयितुं विशेषं बलं ददाति। अस्मात् पूर्वं सर्वकारीय-विद्यालयानां मेधाविनः छात्राः कम्बोडिया-देशं प्रति तथा आईटीआई-शिक्षार्थिनः कजाकिस्तानं प्रति प्रेषिताः। सः विज्ञापितवान् यत् चिकित्सा-महाविद्यालयानां छात्रान् अपि विदेशे शैक्षणिक-अवलोकनाय प्रेषयितुं प्रक्रिया प्रारब्धा अस्ति, साम्प्रतं च चयन-कार्यं प्रचलति।

# भागलपुरजनपदे जलप्लावनस्य विभीषिका

## २०२५-वर्षस्यापि अभिलेखः भङ्गो जातः, गङ्गायाः जलस्तरः ऐतिहासिकजलस्तरस्य समीपे

**भागलपुरम्, नवगछिया 06/09/2026**
**हिमसंस्कृतवार्ताः डॉ विमलेश झा**

बिहारराज्यस्य भागलपुरजनपदे गङ्गानद्याः जलस्तरः पुनरपि तीव्रतया वर्धमानः अस्ति। इस्माइलपुर-बिन्दटोली-तटबन्धस्य जलरोधकसंख्या-७ समीपे रविवासरे प्रातः गङ्गायाः जलस्तरः ३३.१० मीटर इति अभिलिखितः। अयं जलस्तरः वर्षे २०२१ तमे अभिलिखितात् ३३.५० मीटर् इति अद्यावधि-उच्चतमजलस्तरात् केवलं ४० सेन्टीमीटर एव न्यूनः अस्ति। अनेन कारणेन गंगातटबन्धस्य समीपे स्थितेषु ग्रामेषु भयस्य चिन्तायाश्च वातावरणं वर्तते। जलसंसाधनविभागस्य अनुसारम् इस्माइलपुर-बिन्दटोली-क्षेत्रे सचेतकरण(चेतावनी)स्तरः ३०.६० मीटर् इति, संकटस्य सीमा च ३१.६० मीटर् इति अस्ति। वर्तमानकाले गङ्गायाः जलस्तरः ३३.१० मीटर इति प्राप्तः, यः संकटसीमातः १.५० मीटरअधिकः अस्ति। विगतेषु द्वादशहोरासु जलस्तरे प्रायः २० सेन्टीमीटर इत्यस्य वृद्धिः अभिलिखिता।

इस्माइलपुर-बिन्दटोली-क्षेत्रस्य कृते अत्यन्तं भयावहस्थितेः साक्षिणी आसीत्। तस्मिन् वर्षे गङ्गायाः उच्चतमः बाढजलस्तरः ३३.५० मीटर इति अभिलिखितः आसीत्। तदानीं रिङ्गबन्धे क्षरणम्(कटाव )तथा भग्नता च अभवत्, येन समीपस्थानि बहूनि ग्रामाणि जलप्लावनेन प्रभावितानि अभवन्।

अधुना वर्षे २०२६ तमे पुनः गङ्गायाः जलस्तरः ३३ मीटर् इत्यस्य सीमायाः अतिक्रमणं कृतवान् अस्ति।एतेन वर्षे २०२१ तमस्य ऐतिहासिक-उच्चजलस्तरस्य स्मरणेन स्थानीयजनानां चिन्ता पुनरपि वर्धिता अस्ति।

# गंगातटबन्धस्य उपरि मुख्यधारायाः दाबः वर्धते

जलस्तरस्य वृद्ध्या सह गङ्गायाः मुख्यधारायाः प्रवाहः इस्माइलपुर-बिन्दटोली-तटबन्धस्य जलरोधकेषु(स्पर)च अधिकं दाबं जनयति। अस्मिन् काले जलरोधकसंख्या ५ तः ७ पर्यन्तं नदीधारायाः तीव्रप्रवाहः समीपम् आगच्छन् दृश्यते। जलसंसाधनविभागस्य अभियन्तारः तटबन्धस्य जलरोधकानां च निरन्तरं निरीक्षणं कुर्वन्तः सन्ति। विभागमनुसृत्य सम्प्रति तटबन्धः सुरक्षितः अस्ति, तथापि जलस्तरस्य निरन्तरवृद्धेः कारणेन सतर्कता वर्धिता अस्ति। तटबन्धस्य सुरक्षायै ग्रामीणसुरक्षारक्षकाणां नियुक्तेः व्यवस्था अपि पूर्वमेव कृता अस्ति। गतवर्षे अर्थात् २०२५ तमे वर्षे सितम्बरमासे अस्मिन् क्षेत्रे गङ्गायाः जलस्तरः ३२.६३ मीटर् इति अभिलिखितः आसीत्। वर्तमानः ३३.१० मीटर् इतिजलस्तरः तस्मात् प्रायः ४७ सेन्टीमीटर् इति अधिकः अस्ति।विभागीयाभिलेखानुसारम् अस्य क्षेत्रस्य अधिकतमः जलप्लावनजलस्तरः ३३.५० मीटर् इति अस्ति। अतः वर्तमानजलस्तरः तस्मात् केवलं ४० सेन्टीमीटर् इति न्यूनः अस्ति। अर्थात् वर्तमानकाले गङ्गा संकटस्य सीमातः १.५० मीटर् इतिअधिके स्तरे प्रवहति तथा २०२१-वर्षस्य ऐतिहासिक-उच्चतमजलस्तरात् केवलं ४० सेन्टीमीटर् इति दूरे अस्ति।

## जलस्तरस्य वृद्ध्या सह तटबन्धस्य सुरक्षा तथा नदीक्षरणस्य निवारणं प्रमुखा समस्या समुपस्थिता अस्ति। इस्माइलपुर-बिन्दटोली-क्षेत्रे

जलप्लावननियन्त्रणाय क्षरणनिरोधाय च कार्याणि प्रचलन्ति। एतेषां कार्याणां कृते प्रायः १०० कोटिरूप्यकाणां व्ययः निर्धारितः अस्ति। जुलाईमासे विभागीय-उड्डयननिरीक्षणदलद्वारा कार्याणां तकनीकीपरीक्षणमपि कृतम् आसीत्। स्थानीयग्रामीणाः कथयन्ति यत् यदि जलस्तरः एवं निरन्तरं वर्धते तथा गङ्गायाः मुख्यधारा तटबन्धस्य समीपे एव प्रवहति, तर्हि परिस्थितिः अधिका गम्भीरा भवितुम् अर्हति। ते तटबन्धस्य संवेदनशीलस्थलेषु चतुर्विंशतिः होराः पर्यवेक्षणं, पर्याप्तजलप्लावननिरोधकसामग्रीणां व्यवस्था तथा क्षरणनिरोधककार्याणां शीघ्रसम्पादनस्य च अपेक्षां कुर्वन्ति।सम्प्रति प्रशासनस्य जलसंसाधनविभागस्य च कृते आगामिहोराः अत्यन्तं महत्त्वपूर्णाः सन्ति। गङ्गायाः जलस्तरः २०२१-वर्षस्य विनाशकारी-उच्चतमस्तरात् केवलं ४० सेन्टीमीटर इत्येव अधः स्थितः अस्ति। गतद्वादशसु होरासु २० सेन्टीमीटर् इति जलवृद्धेः कारणेन प्रशासनं जलसंसाधनविभागश्च नदीजलस्तरस्य, तटबन्धस्य तथा संवेदनशीलक्षेत्राणां निरन्तरं पर्यवेक्षणं कुर्वन्तौ स्तः। स्थानीयजनानां सुरक्षां सुनिश्चितुं त्वरित-सतर्कता,आवश्यकजलप्लावन-निरोधकसामग्रीणां व्यवस्था तथा आपत्कालीनव्यवस्थायाः सुदृढीकरणम् इति सम्प्रति सर्वाधिकं आवश्यकं मन्यते।

# बिहार- भवन- उपविधि- २०२६ प्रारूपे मन्त्रिसमूहस्य उपवेशनम्




## सरलैः नियमैः, त्वरित-स्वीकृत्या, नम्य-प्रावधानैश्च नगरीय-विकासः प्राप्स्यति नवां गतिम्

**हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्।**

माननीयानाम् उपमुख्यमन्त्रिणां विजयकुमारचौधरी- महोदयानाम् अध्यक्षत्वे रविवासरे सेचनभवनस्थ- सभागारे नगरविकास एवम् आवासविभागेन सम्बद्धायाः 'बिहार- भवन- उपविधि- २०२६' इत्यस्याः प्रारूपोपरि गठीतस्य उच्चस्तरीय- मन्त्रिसमूहस्य उपवेशनम् आयोजितम्। उपवेशने प्रस्तावित- भवन- उपविधेः विविधानां प्रावधानानां, नियमन-प्रक्रियाणां सरलीकरणस्य पारदर्शकतायाश्च, राज्ये भवननिर्माणस्य नगरीय- विकासस्य च सुगमतायै गतये च सम्बद्धेषु महत्त्वपूर्ण-बिन्दुष्वाधृत्य विस्तृतं विचार-विमर्शनं व्यधायि।

उपवेशने सूचना- जनसम्पर्क- ग्रामीणविकास-विभागयोः माननीयाः मन्त्रिणः श्रीश्रवणकुमारः; सहकारिताविभागस्य माननीयाः मन्त्रिणः रामकृपालयादवः; नगरविकास एवम् आवास-विभागस्य माननीयाः मन्त्रिणः नीतीशमिश्रवर्याः लोकस्वास्थ्य-अभियान्त्रिकी-विभागस्य माननीयाः मन्त्रिणः सञ्जयकुमारसिंहाश्च समुपस्थिताः आसन्।

माननीयाः उपमुख्यमन्त्रिणः विजयकुमारचौधरीमहोदयाः सर्वेभ्यः हितधारकेभ्यः कृतज्ञतां प्रकटयन्तः अकथयन् यत् अस्मिन् महत्त्वपूर्णावधौ मार्गदर्शनाय सकारात्मकसहयोगाय च सर्वेषां हितधारकाणां कृते धन्यवादाः व्याह्रियन्ते। ते विशेषरूपेण उच्चस्तरीय-समूहस्य सदस्यमन्त्रिणः, अस्य विषयस्य नोडल- विभागभूतस्य नगरविकास एवम् आवासविभागस्य प्रधानसचिवानां, सर्वेषां पदाधिकारिणां सहयोगानां च सक्रिय-सहभागितायै विशेषरुचये च कृतज्ञतां न्यवेदयन्। तेनोक्तं यत् हितधारकैः प्रदत्ताः सकारात्मकपरामर्शाः बिहार- भवन- उपविधि- २०२६ अधिकप्रभाविनीं, पारदर्शिनीं, जनोपयोगिनीं च विधातुं महत्त्वपूर्णाः सिद्धाः भविष्यन्ति। नगरविकास एवम् आवास-मन्त्रिणा नीतीशमिश्रेण निगदितं यत् बिहार- भवन- उपविधि- २०२६ इत्यस्याः प्रारूपं पारदर्शकतायाः, क्षिप्र-प्रक्रियायाः, शाश्वत-विकासस्य च सिद्धान्तेष्वाधारितं वर्तते। इदं बिहारस्य नगरीय-परिदृश्ये सकारात्मकं परिवर्तनम् आनेतुं, सुव्यवस्थितस्य, सुगमस्य, विकासोन्मुखस्य च नगरीकरणस्य गतये एकं प्रगतिशीलं पदक्षेपम् अस्ति। तेन प्रतिपादितं यत् माननीयानां मुख्यमन्त्रिणां सम्राट्चौधरीमहोदयानां 'विकसित-बिहार' सङ्कल्पस्यानुरूपं बिहार- भवन- उपविधि- २०२६ प्रारूपं राज्यस्य नगराणां सुनियोजिताय, आधुनिकाय, तीव्रविकासाय च सञ्चिन्त्य निर्मितम् अस्ति। सरलैः पारदर्शिभिः च नियमैः भवननिर्माणाय निवेशाय च गतिः लप्स्यते, येन नगरेषु श्रेष्ठतराधारभूत- संरचनायाः, आर्थिक-क्रियाकलापानां, वृत्ति-अवसराणां च विस्तारः सेत्स्यति।

उपवेशनकाले नगरविकास- एवम् आवास-विभागस्य प्रधानसचिवेन विनयकुमारेण उच्चस्तरीय- मन्त्रिसमूहस्य सदस्यानाम् उपस्थितानां च हितधारकाणां पुरतः बिहार- भवन- उपविधि- २०२६ प्रारूपस्य विस्तृतं प्रस्तुतीकरणं कृतम्। सः प्रस्तावित- उपविधेः मुख्यानां प्रावधानानां, नियामक-प्रक्रियाणां सरलीकरणस्य तथा भवननिर्माणं नगरीय-विकासं च सुगमतरं, पारदर्शिनं, प्रभावान्वितं च कर्तुं प्रस्तावित- नियमानां सूचनाम् अदात्।

अस्मिन् अवसरे विभागस्य सचिवः, बुडको इत्यस्य प्रबन्धनिदेशक अनिमेषपराशरः, पाटलिपुत्र-नगरनिगमस्य आयुक्तः यशपालमीणाः, विभागस्य वरीयांसः अधिकारिणः, क्रेडाई-बिहार, बिहार-इण्डस्ट्रीज- एसोसिएशन, बिल्डर्स-एसोसिएशन, बिहार- चैम्बर- ऑफ- कॉमर्स- एण्ड- इण्डस्ट्रीज इत्येतेषां प्रतिनिधयः, गृहस्वामिनः अपि समुपस्थिताः आसन्।

# मखान्नोत्पादनात् प्रसंस्करणं यावत् कृषकाणां कृते वर्धमानाः आर्थिकावसराः




## परिवर्तिता कृषिप्रविधिः मूल्यसंवर्धनं च ग्रामीणार्थव्यवस्थायाः सुदृढम् आधारं रचयतः - डॉ. दिव्यांशुशेखरः

**हिमसंस्कृतवार्ताः- राघवनाथ झा, दरभङ्गा।**

कृषिविज्ञानकेन्द्रे दरभङ्गायां 'मखानोत्पादनं प्रसंस्करणं च' इति विषये एकदिवसीय-प्रशिक्षणकार्यक्रमस्य आयोजनं केन्द्रस्य अध्यक्षस्य डॉ. दिव्यांशुशेखरस्य अध्यक्षत्वे सम्पन्नम्। अस्मिन् कार्यक्रमे राष्ट्रियमखाना- अनुसन्धानकेन्द्रस्य (दरभङ्गा) वैज्ञानिकाः डॉ. मनोजकुमारः डॉ. धर्मेन्द्रकुमारश्च विशिष्टातिथिरूपेण समुपस्थिताः अभवन्। दरभङ्गामण्डलस्य विभिन्नप्रखण्डेभ्यः समागताः प्रायः पञ्चाशत् कृषकाः प्रशिक्षणं प्राप्तवन्तः। डॉ. मनोजकुमारः अवदत् यत् बिहारस्य परिचयेन सम्बद्धः मखानासस्यः इदानीं पारम्परिकतडागेषु एव सीमितः नास्ति। परिवर्तमाना कृषिप्रविधिः, वर्धमाना विपणि-माङ्गः, स्वास्थ्यजागरूकता, संस्करणस्य निर्यातमार्गस्य च सम्भावनाश्च इमं महतीं वाणिज्यिकसस्यरूपेण प्रतिष्ठापितवत्यः। क्षेत्रधारित-मखानोत्पादनस्य विस्तारेण कृषकाः जलाप्लावितां भूमिमपि आयस्य वैकल्पिकस्रोतरूपेण परिवर्तयितुम् अवसरं लभन्ते। केन्द्राध्यक्षः डॉ. दिव्यांशुशेखरः कृषकेभ्यः क्षेत्रधारितस्य तडागधारितस्य च मखानोत्पादनस्य तान्त्रिकज्ञानं प्रदत्तवान्। सः न्यवेदयत् यत् क्षेत्रेषु मखानोत्पादनाय समतला भूमिः, सुदृढानि पाल्यानि (आलयः), पर्याप्ता जलधारणक्षमता, उत्तमा सेचन-जलनिर्गमव्यवस्था च अनिवार्या वर्तते। क्षेत्रधारितप्रणाल्यां जलस्तरस्य, पादपवृद्धेः, तृणनियन्त्रणस्य, कीट-रोगप्रबन्धनस्य चोपरि तुलनात्मकरूपेण श्रेष्ठं नियन्त्रणं सम्भवति। सः अकथयत् यत् मखानोत्पादनेन सह प्रसंस्करणं मूल्यसंवर्धनं च कृषकाणाम् आयवृद्धेः प्रमुखं साधनं भवितुम् अर्हति। पारम्परिकरूपेण तडागेषु क्रियमाणायां कृषौ अधिकश्रमस्य आवश्यकतेति। आधुनिकप्रविधेः श्रमसंरक्षक-उपकरणानां च प्रयोगेण उत्पादनं प्रसंस्करणं च सुव्यवस्थितं लाभप्रदं च कर्तुं शक्यते। राष्ट्रियमखाना-अनुसन्धानकेन्द्रस्य डॉ. धर्मेन्द्रकुमारः मखाना-प्रसंस्करणस्य विस्तृतं विवरणं प्रस्तुतवान्। सः अबोधयत् यत् बीजसङ्ग्रहणात् परं प्रक्षालन- शुष्कन- वर्गीकरण- भर्जन- स्फोटन- छानन- संवेटनप्रक्रियाभ्यः (पैकेजिंग) निर्गत्य मखाना उपभोक्तॄन् प्रति प्राप्नोति। संस्करात् सुदृढसंवेटनाच्च अपक्वोत्पादस्य अपेक्षया अस्य मूल्यं बहुधा वर्धते। सः न्यवेदयत् यत् भर्जितं (रोस्टेड),सम्भारयुक्तं, पेरी-पेरी इति पर्णहरितं वनौषधियुक्तं च मखान्नम्, मखान्नचूर्णम्, मोदकानि, मिष्टान्नानि, पौष्टिकाहारः, मखानोपेत-धान्यानि च मूल्यवर्धितोत्पादरूपेण ग्रामीणस्तरे सज्जीकर्तुं शक्यन्ते। अनेन स्थानीयस्तरे उत्पादनात् आरभ्य प्रसंस्करणं, संवेटनं, विपणनं यावत् सम्पूर्णा मूल्यशृङ्खला विकसिता भवितुम् अर्हति।

कार्यक्रमस्य सञ्चालिका डॉ. पूजाकुमारी अवदत् यत् मखान्नस्य सम्पूर्णा मूल्यशृङ्खला ग्रामीणक्षेत्रेषु आजीविकायाः नूत्नावसरान् जनयितुं शक्नोति। महिला- स्वयंसहायतासमूहाः प्रक्षालनेन, वर्गीकरणेन, भर्जनेन, रुचिसंवर्धनेन, संवेटनेन च सह युक्ताः भूत्वा स्वकीयम् आयं वर्धयितुं शक्नुवन्ति। तत्रैव ग्रामीणयुवानः लघु-प्रसंस्करणघटकानां (मिनी प्रोसेसिंग यूनिट), संवेटनकेन्द्राणां, स्थानीय-मखान्न-मुद्राणां च माध्यमेन उद्यमितायाः दिशि अग्रेसराः भवेयुः।अस्मिन् कार्यक्रमे कृषियान्त्रिकीवैज्ञानिकी अभियान्त्री निधिकुमारी, पादपरक्षणवैज्ञानिकः डॉ. अभिषेकराणा, क्षेत्रप्रबन्धकः डॉ. चन्दनकुमारश्च सहिताः केन्द्रस्य अपरे वैज्ञानिकाः कर्मचारिणश्च उपस्थिताः आसन्।

# दिल्ली-स्टार्टअप-अन्तर्निवेशनीतिः २०२६ — युवोद्यमिनां कृते नूतनावसराः




**नवदेहली/भागलपुर 06/09/2026**
**हिमसंस्कृतवार्ताः डॉ विमलेश झा**

नूतनविचाराणां तथा उद्यमशीलतायाः प्रवर्धनस्य उद्देशेन राज्यसर्वकारेण महत्त्वपूर्णा घोषणा कृता अस्ति। दिल्ली-स्टार्टअप-अन्तर्निवेशनीतेः २०२६ अन्तर्गतं ₹४०० कोटिरूप्यकाणां प्रावधानं कृतम् अस्ति। अस्य धनस्य उपयोगः आधारभूतसंरचनायाः विकासाय, निवेशकानाम् आकर्षणाय, उद्यमिनां स्थापनायै तथा मार्गदर्शन-कार्यक्रमानां सुदृढीकरणाय च भविष्यति। मन्त्रिमण्डलस्य मन्त्री आशीष सूदः अवदत् यत् अस्य आयव्ययपत्रस्य (बजट)प्रमुखं लक्ष्यं दिल्लीं नवोन्मेषस्य उद्यमशीलतायाश्च प्रमुखकेन्द्ररूपेण विकसितुं वर्तते। तेन कथितं यत् वर्षे २०१४ तः आरभ्य राष्ट्रियस्तरे तीव्रगत्या विकसितानां स्टार्टअप-उद्यमानां तुलनायां दिल्लीप्रदेशः किञ्चित् पृष्ठे अभवत्। अतः अधुना नूतनविचाराणां तथा उद्यमशीलतायाः गतिः वर्धयितुं विशेषप्रयासाः क्रियन्ते।

वर्षे २०१४ सम्पूर्णे देशे केवलं ३५० स्टार्टअप्-उद्यमाः आसन्, किन्तु अधुना तेषां संख्या द्विलक्षाधिकं जाता अस्ति। दिल्लीप्रदेशः अपि अस्मिन् क्षेत्रे स्वस्य प्रगतिं तीव्रतरं करिष्यति। दिल्लीस्थेषु प्रमुखेषु अनुसन्धानकेन्द्रेषु, शैक्षणिकसंस्थासु च विद्यमानाः युवाप्रतिभाः प्रत्यक्षतया जीविकोपार्जननिर्माणेन व्यवसायेन च संयोजिताः भविष्यन्ति। एतेन युवा-उद्यमिनां प्रतिभायाः समुचितः उपयोगः भविष्यति तथा नूतनानां व्यवसायानां विकासाय अनुकूलं वातावरणं निर्मीयते।

₹४०० कोटिरूप्यकाणां प्रोत्साहनराशेः माध्यमेन युवानां कौशलविकासाय, नवोन्मेषाय, उद्यमशीलतायै च समुचितं प्रोत्साहनं प्रदास्यते। अनेन नूतनेषु क्षेत्रेषु जीविकोपार्जनस्य बहवः अवसराः सृज्यन्ते तथा दिल्लीप्रदेशः नवोन्मेषस्य स्टार्टअप-उद्यमानां च प्रमुखकेन्द्ररूपेण विकसितः भविष्यति।

## किम् भवन्तः जानन्ति?



### मधुमक्षिकायाः नेत्राणि

मधुमक्षिकायाः (Honeybee) पञ्च नेत्राणि भवन्ति— द्वे मुख्ये नेत्रे तथा ललाट-भागे त्रीणि सूक्ष्माणि नेत्राणि!

### जिह्वायाः रसास्वादनम्

चित्रपतङ्गः (Butterfly) पादैः एव भोजनस्य रसम् अनुभवति, जिह्वया न! तस्य पादेषु एव रसास्वादन-तन्त्राणि भवन्ति।

### मधु कदापि न नश्यति मधु (Honey)

एकमात्रम् एव तादृशं भोजनम् अस्ति, यत् सहस्रशः वर्षाणि यावत् अपि शुद्धं तिष्ठति तथा कदापि विकृतं न भवति।

### अष्टपादस्य रक्तम्

अष्टपादस्य (Octopus) त्रीणि हृदयानि भवन्ति, तस्य रक्तस्य वर्णः च नीलः (Blue) भवति!

### उलूकस्य दृष्टिः

उलूकः (Owl) स्वनेत्रे चालयितुं न शक्नोति, किन्तु सः स्वकण्ठं २७० अंशं (270 degrees) यावत् परिवर्त्य पृष्ठतः अपि द्रष्टुं शक्नोति।





हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# कलिधर्मः

श्रीमद्भागवते कलिवर्णनं यदस्ति, तदेव प्रत्यक्षं दृश्यते अद्य। समयो महान् बलवान् अस्ति। यथा यथा कलिप्रभावो वर्धते, तथा तथैव उत्तरोत्तरं धर्मः, सत्यं, पवित्रता, क्षमा, दया, आयुः, बलं, स्मरणशक्तिः इत्यादीनां लोपो भवति। अस्मिन् युगे यस्य पार्श्वे अधिकं धनं स्यात्, स हि समाजे कुलीनः, सदाचारी, सद्गुणी च मन्यते। एवं यस्य हस्ते शक्तिसामर्थ्यादिकं स्यात्, स हि धर्मन्यायव्यवस्थादिकं स्वस्य अनुकूलं कर्तुं शक्नुयात्। वैवाहिक-सम्बन्धार्थं कुल- शील-योग्यतादीनां विचारो न क्रियते, अपितु युव-युवत्योः पारस्परिकी रुचिः हि तत्सम्बन्धस्य कारणं भवति। व्यवहारस्य निपुणता सत्येन, मनुष्यत्वेन च संयुक्ता, अवलम्बिता वा न भवति, अपि तु यो यावत् कपटवञ्चनादिकं कर्तुं प्रभवेत्, स हि समाजे व्यवहारकुशलो मन्यते। दम्पत्योः श्रेष्ठतायाः आधारः, शीलसंयमादिको न भवति, अपि तु तयोः रतिकौशलं हि तदाधारो भवति। ब्राह्मणस्य परिचयः तस्य गुणस्वभावादिभिः न भवति, अपि तु यज्ञोपवीतं हि तस्य परिचयचिह्नं भवति। वस्त्रभूषणादिभिः हि ब्रह्मचारी, संन्यासी, कश्चन आश्रमी वा परिचियते, न वा सदाचरणेन। यः उत्कोचं प्रदातुम् असमर्थः, स न्यायालयात् समुचितं न्यायं न प्राप्नुयात्। यो वाचालः, वाक्चतुरो वा स्यात्, स हि महापण्डितो गण्यते अस्मिन् कलौ। अद्य दरिद्रता हि असाधुत्वस्य कारणं जातम्। यो यावत् दम्भत्वम् आचरेत्, व्यभिचारादिषु लिप्तः स्यात्, स हि महासाधुः आख्यायते। अधुना वेशभूषाकुण्डलादिभिः हि देहस्य शृङ्गारो परमपवित्रो मन्यते, अपि तु स्नान-शास्त्रविधि- संस्कारादिभिः नैव इत्यादिकं सर्वं वैपरीत्यं गतमधुना इति, शम्।





# "संस्कृत- कथामञ्जरी"

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

## "अथ सरःपूरणं नाम अष्टमोपाख्यानम्" (२)

तेषां वचनं श्रुत्वा विक्रमार्को राजा स्वयं तत्र गतो जलाशयस्थस्य विष्णोर्महाप्रासादमतिमनोहरं तथा विशालं तडागं दृष्ट्वा विस्मयं गतो मनसि विचारयति- इदं तडागं यदि स्वकण्ठरक्तेन सेचयिष्यामि तर्हि निःसंशयं जलैः परिपूर्णं भविष्यति, तदा च सकललोकस्योपकारो भविष्यति। इदं मम शरीरं सर्व्वथा वर्षशत स्थित्वाऽपि नाशमेव यास्यति, अतः सद्सञ्ज्ञानवता महत्ता पुरुषेण शरीरे ममत्वं न कार्यं, परोपकारार्थं शरीरमपि दातव्यम्। उक्तञ्च-

**"शतमपि च समानां जीवितं धारयित्वा,**
**शयनमधिशयानः सर्वथा नाशमेति।**
**सुलभविपदि देहे सर्व्वलोकैकनिन्द्यं, न विदधति ममत्वं ये हि लोकोत्तरास्ते।।"**

एवं विचार्य्य असौ पुरःस्थितप्रासादगतजलशयनस्य विष्णोः पूजां विधाय नमस्कृत्य च भणति- भो जलदेवते! त्वं द्वात्रिंशल्लक्षणयुक्तपुरुषस्य कण्ठरक्तं वाञ्छासि तर्हि सहर्षमुपपन्नस्य मम अनेन कण्ठरक्तेन तृप्ता सति इदं तडागं जलैः परिपूर्णं कुरु, इत्युक्त्वा यावत् कण्ठे खड्गं प्रहारोद्यतं करोति, तावद्देवतया तया खड्गं धृत्वा भणितं- भो वीर! तव अनेन औदार्येण अहं प्रसन्नाऽस्मि, वरं वृणीष्व। राजा अवदत्- देवि! यदि मम प्रसन्ना जाताऽसि तर्हि इदं तडागं जलैः परिपूर्णं कुरु इति। पुनर्देव्या भणितं- भो राजन्! त्वम् अस्मात् स्थानात् त्वरितं निर्गच्छ ततो निर्गच्छन् यावत् पश्यसि, तावज्जलैरिदं परिपूर्णं भविष्यति। तच्छ्रुत्वा राजा सत्वरं तडागपालीं गतः तडागश्च जलैः परिपूर्णशभूत्। एवम् आश्चर्य्यमवलोक्य सहर्ष राजा विक्रमोऽपि स्वनगरमगमत्। एवं कथां कथयित्वा पुत्तलिका भोजराजमवादीत्- भो राजन्! त्वयि एवमौदार्य्यं तथा परोपकारसत्त्वसारप्रभृतयो गुणाः विद्यन्ते चेत्, तर्ह्यस्मिन् सिंहासने समुपविश। राजा तूष्णीमासीत्।

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया विचित्राः वार्ताः सङ्गृहीताः। हङ्गरीदेशे एका गर्त-खननस्पर्धा आयोजिता। श्मशाने जनैः गर्ताः खाताः।

**नन्दिनी-** अहो, अतीव विस्मयकरम्! मरणविषये एतादृशी स्पर्धा मया कदापि न श्रुता। अपरा वार्ता अमेरिकादेशात् प्राप्ता। तत्र चलति याने चौरैः कुक्कुटमांसं चोरितम्।

**काव्या-** चलति याने चौर्यम्? चलच्चित्रवत् साहसं चौरैः कृतम्! तृतीया वार्ता अतीव हास्यकरी। एकेन जनेन अन्येषाम् जनानां पृष्ठ-कण्डूयन-कार्यं कृतम्। तेन प्रतिमासं बहु-धनम् उपार्जितम्।

**नन्दिनी-** पृष्ठ-कण्डूयनेन धनम्? अद्भुतं कार्यं तत्। अन्तिमा वार्ता पञ्जाबराज्यात् आगता। एकस्य पुरुषस्य शरीरात् प्राणाः गताः इति कुटुम्बेन चिन्तितम्। तस्य दाह-संस्कारः अपि कुटुम्बेन कृतः। पञ्चदश-दिनानन्तरं सः पुरुषः जीवितः एव कारागारे अस्ति इति तेन ज्ञातम्।

**काव्या-** किम्? सः जीवितः एव! अन्यस्य एव पुरुषस्य दाह-संस्कारः कुटुम्बेन कृतः! सत्यम्, अद्यतनीनां वार्तानां सङ्ग्रहः अतीव विचित्रः।

## उद्योगिनं पुरुषसिंहमुपैति
**लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति।**
## दैवं निहत्य कुरु पौरुष-मात्मशक्त्या, यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।।

भावार्थः- उद्यमशीलं साहससम्पन्नं च पुरुषसिंहं लक्ष्मीः अनुगच्छति। “मनुष्यस्य यत् किञ्चित् प्राप्तव्यं तत् केवलं दैवेन एव प्राप्यते” इति कापुरुषाः वदन्ति। अतः मनुष्यः दैवस्य चिन्तां परित्यज्य स्वस्य आत्मशक्त्या पुरुषार्थं कुर्यात्। पूर्णशक्त्या प्रयत्नं कृत्वापि यदि कार्यं न सिध्यति, तर्हि तत्र मनुष्यस्य कः दोषः?

तात्पर्यम्- अयं श्लोकः मानवजीवने पुरुषार्थस्य, परिश्रमस्य आत्मविश्वासस्य च महत्त्वम् उद्घाटयति। केवलं भाग्यस्य आश्रयं कृत्वा निष्क्रियतया उपविष्टस्य पुरुषस्य जीवनस्य लक्ष्यं कदापि सुलभतया न प्राप्यते। सफलता तस्यैव समीपं गच्छति, यः कठिनपरिस्थितिष्वपि धैर्यं न त्यजति तथा स्वसामर्थ्यं ज्ञात्वा निरन्तरं प्रयत्नं करोति। मनुष्यस्य जीवनमार्गे अनेकानि विघ्नानि भवन्ति। कदाचित् परिस्थितयः प्रतिकूलाः भवन्ति, कदाचित् प्रयासस्य परिणामः तत्काले न दृश्यते। तथापि असफलतां दृष्ट्वा प्रयत्नं त्यक्तुं न उचितम्। असफलता अन्तिमं लक्ष्यं न, अपि तु सफलतायाः मार्गे एकः अनुभवः अस्ति। अतः मनुष्येण भाग्यदोषं न आरोप्य स्वकर्मणि विश्वासः करणीयः। यथाशक्ति ईमानदारीपूर्वकं सततं प्रयत्नं कृत्वा एव जीवनस्य उन्नतिः सम्भवति।

**अतः श्लोकस्य मुख्यसन्देशः- “भाग्यं न प्रतीक्षेत, पुरुषार्थं कुर्यात्।”**



- मित्रलाभः (१.३३)
- प्रस्तुतिः प्रदीपकुमारसैनी

## हास्यकणिका - विदुरः

पतिः पत्न्यै वदति- अहो, यदि त्वं गुडः अभविष्यः, तर्हि त्वं सर्वदा मया सह मधुरं मधुरं वदिष्यसि।
पत्नी उक्तवती- ओह! यदि त्वम् आर्द्रकः अभविष्यः, तर्हि अहं त्वां सर्वदा कुटयिष्यामि। 🤣 😍
पतिः- 😳 😖 😨 😠 😱

# शिक्षकदिवसे विद्यार्थिनः शिक्षकाणां भूमिकाम् ऊढवन्तः

**हिमसंस्कृतवार्ताः- राघवनाथ झा, अड़रियासङ्ग्रामः, मधुबनी**

उत्क्रमित-माध्यमिक-विद्यालये अड़रियासङ्ग्रामे शिक्षकदिवसः गौरवपूर्णरीत्या समुपोत्थापितः। अस्मिन् अवसरे विद्यार्थिनः शिक्षकाणां दायित्वं निर्वहन्तः विद्यालयस्य शैक्षणिकीं प्रशासनीकीं च व्यवस्थाम् असञ्चालयन्। छात्रा विद्याकुमारी प्रधानाध्यापकस्य भूमिकाम् ऊढ्वा स्वकीयस्य नेतृत्वकौशलस्य परिचयं प्रादात्। तत्रैव कक्षाप्रबन्धकाः समयसारिणीं संविद्य विद्यालयस्य क्रियाकलापान् सुनियोजितरूपेण प्रावर्तयन्।

छात्राणाम् अनुशासनम्, नेतृत्वदक्षता, उत्कृष्टप्रदर्शनं च सर्वेषां चेतांसि सममोहयत्। शिक्षणकर्मणि प्रशंसनीयं कार्यं कृतवन्तः विद्यार्थिनः पदकैः संवर्धिताः। प्रधानाध्यापकः डॉ. अमितकुमारपाण्डेयः अवदत् यत् एतादृशैः कार्यक्रमैः छात्रेषु आत्मविश्वासः, नेतृत्वगुणाः, प्रबन्धनक्षमता च विकसन्ति। सः न्यवेदयत् यत् बालकेभ्यः दायित्वार्पणेन तेषु निर्णयग्रहणसामर्थ्यं सामूहिकताभावना च सुदृढा भवति। अस्मिन् प्रसङ्गे प्रधानाध्यापकेन विद्यालयस्य समेभ्यः नियमितशिक्षकेभ्यः उत्कृष्टाय कार्याय अभिनन्दनपत्रं स्मृतिचिह्नं च प्रदाय ते समादृताः। कार्यक्रमस्य समापनं छात्राणां प्रतिभायै, नेतृत्वसामर्थ्याय, विद्यालयस्य च यशोवृद्धये समर्पितम् आसीत्।

# मुसायनायक सीतादेवी एजुकेशनल ट्रस्ट द्वारा राष्ट्रिय शिक्षक सम्मान समारोहस्यायोजनम्



बिहारप्रान्ते समस्तीपुरमण्डले रोसड़ानाम्निविधान-सभाक्षेत्रेऽवस्थिते पालकीनामकेऽतिविशालगृहे मुसायनायकसीतादेवी-एजुकेशनलट्रस्टद्वारा-आयोजितराष्ट्रियशिक्षक सम्मानसमारोहकार्यक्रमे शिक्षायामुत्कृष्टकार्यकरणाय छात्रचिन्तकाय विद्यालयस्थ तथा च संकुलस्थ एवं अन्येषां सर्वेषां छात्राणां सदा सर्वदा हितकाराय नवाचारपद्धतिद्वारा पठनपाठनकार्यकरणाय टीएलएमद्वारापि सुबोधनकार्यकरणाय विविधवर्गीयगति-विधिसंचालनाय येन छात्राणां अवगमने सारल्यं भवेत्तदर्थं वैशालीमण्डस्थ हरिपुर-अनुमण्डलस्थ-हरिपुरप्रखण्डे सरस्वतीविद्यानिकेतन सह माडलस्कूल प्राक्तननाम्ना राजकीयकृतोच्च-विद्यालय,सेन्दुआरी,हाजीपुरम्,वैशालीमण्डलम्,इति समाजे प्रखण्डेऽनुमण्डले इदानीमपि प्रचलितः प्रसृतः तत्रस्थैव संस्कृतविभागीयः आचार्य डॉ रविरंजन कुमार झा इत्यस्य चयनं राष्ट्रीय शिक्षक सम्मान समारोह 2026 तमे वर्षे पुरस्कृताय अभवत् अद्य सितम्बरमासीये षड्तमे दिनाङ्के तैः पुरस्कृतापि। तस्मिनेव राष्ट्रीय शिक्षक सम्मान समारोहे भारतसर्वकारस्य केन्द्रियजल-शक्तिराज्यमन्त्री डा राजभूषणचौधरी महाभागाः, बिहारसर्वकारस्य युवारोजगारएवंकौशलविकास-मन्त्री अरुणशङ्कर-प्रसादमहाभागाः सदस्य-बिहारविधानपरिषदः डॉ तरुणकुमारमहाभागाः ,उच्च शिक्षा,शिक्षाविभागस्य पटनाबिहारतः प्रो (डॉ) एन के अग्रवालः सदस्य बिहार विधानसभायाः बीरेन्द्रकुमारमहाभागाः , सदस्य बिहार राज्य धार्मिक न्यास बोर्ड पटनायाः सायणकुणालमहाभागाः इत्येषां गण्यमान्य-महाभागानां पुरतः रविरञ्जनकुमारझावर्येणोक्तं शिक्षकस्य महत्त्वविषये कालिदासस्यश्लोकमालक्ष्य

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था**
**सङ्क्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां धुरि**
**प्रतिष्ठापयितव्य एव।।**

अर्थात स एव शिक्षकः वर्तते यस्मिन् विषयस्य सम्यक् ज्ञानं भवेदितोपि छात्राणां समक्षे सरलतया प्रस्तुतकर्तुं सक्षमं,उभयं गुणं भवेत् स शिक्षकः , अर्थात शिक्षकाणां कर्तव्यं केवलं विद्यालयं गमनागमनं नास्ति तथापि अहोरात्रं भविष्यनिर्माणमस्ति, अतः उच्यते शिक्षक एव राष्ट्रनिर्माता भवति इति शम्

# परिवर्तिनी एकादशी-व्रतम्

भाद्रपदमासस्य शुक्लपक्षे या एकादशी तिथिः भवति, सा परिवर्तिनी एकादशी इति कथ्यते। अस्याः एकादश्याः धार्मिकदृष्ट्या विशेषं महत्त्वम् अस्ति। एषा एकादशी वामन-एकादशी, जयन्ती- एकादशी अथवा पार्श्वपरिवर्तिनी एकादशी इत्यादिभिः नामभिः अपि प्रसिद्धा अस्ति।

पुराणेषु वर्णितानुसारं चातुर्मास्यकाले भगवान् विष्णुः क्षीरसागरे शेषशय्यायां योगनिद्रां करोति। अस्यां एकादश्यां भगवान् विष्णुः स्वस्य पार्श्वं परिवर्तयति, अतः इयं तिथिः परिवर्तिनी एकादशी इति नाम्ना प्रसिद्धा अभवत्। अस्यां तिथौ भगवान् विष्णोः वामनावतारस्य विशेषरूपेण पूजनं क्रियते।एकादशीव्रतस्य मुख्योद्देश्यं मनसः शुद्धिः, इन्द्रियाणां संयमः, भगवद्भक्तेः संवर्धनम् अस्ति। भक्ताः प्रातःकाले स्नानं कृत्वा स्वच्छानि वस्त्राणि धारयन्ति। ततः भगवान् विष्णोः पूजनं कुर्वन्ति। दीपं प्रज्वाल्य धूपं, पुष्पं, तुलसीदलानि, फलानि तथा नैवेद्यं समर्पयन्ति। विष्णुसहस्रनामस्तोत्रस्य, भगवद्गीतायाः अथवा विष्णुमन्त्रस्य पाठः अपि शुभः मन्यते। व्रतधारिणः स्वसामर्थ्यानुसारं निराहारं, फलाहारं अथवा सात्त्विकाहारं कुर्वन्ति। अन्नस्य सेवनं सामान्यतः वर्ज्यते। अस्य व्रतस्य महत्त्वं केवलं उपवासे निहितं नास्ति; अपि तु सत्यपालने, दयायां, संयमे, सेवायां तथा भगवद्भक्तौ अपि निहितम् अस्ति। वामनावतारः अस्याः एकादश्याः विशेषः सम्बन्धः अस्ति। भगवान् विष्णुः वामनरूपेण राजा बलिं याचितवान्। त्रिभिः पदैः सः सम्पूर्णं विश्वं व्याप्य बलिना कृतस्य दानस्य महत्त्वं स्थापितवान्। अतः अस्यां तिथौ दानस्य, धर्मस्य तथा विनयस्य विशेषं महत्त्वं मन्यते। एकादशीव्रतस्य पारणं द्वादश्यां तिथौ शास्त्रोक्तसमये करणीयम्। पारणात् पूर्वं भगवतः विष्णोः स्मरणं, पूजनं च करणीयम्। ✍दिनेशशास्त्री, सिरमौरः

# बोकारो-: सेक्टर-४ जी-मध्ये कृष्ण-जन्माष्टम्युत्सवे अरुणपाठकेन भजनैः बद्धं



**संवाददाता प्रेरकः च -सौरभः दे**

**"नन्दक घर सानन्द आएल नव नन्दन रे..."**
**"एक राधा एक मीरा दोनों ने श्याम को चाहा..."**

बोकारो। सेक्टर-४ जी-स्थिते धर्मस्थान-हनुमानमन्दिर-परिसरे आयोजिते कृष्णजन्माष्टम्योत्सवे शनिवासरे सायंकाले प्रसिद्धेन गायककेन अरुणपाठकेन विविधैः मधुरैः भक्तिगीतैः उपस्थितानां श्रद्धालूनां मनांसि भक्तिभावेन आपूरितानि। तस्य मनोहारिण्या भजन-प्रस्तुत्या सम्पूर्णं वातावरणं भक्तिमयं जातम्।

प्रसिद्धगीतकारस्य शिवकुमार झा 'टिल्लू' इत्यस्य रचनां मैथिलीभाषायां कृष्णजन्म-सोहरगीतं "नन्दक घर सानन्द आएल नव नन्दन रे, ललना रे यशोदा के मन मकरन्द करथि अभिनन्दन रे..." इति अरुणपाठकेन सुमधुरस्वरेण प्रस्तुतम्। तदनन्तरं तेन "एक राधा एक मीरा दोनों ने श्याम को चाहा...", "कान्हा आन पड़ी मैं तेरे द्वार...", "श्याम तेरी बंसी पुकारे राधा नाम...", "तोरा मन दर्पण कहलाए...", "राधिके तूने बंसरी चुराई..." तथा "यशोमती मैया से बोले नंदलाला..." इत्यादीनि लोकप्रियानि भक्तिगीतानि प्रस्तुतानि।भजनानां मधुरस्वरेण उपस्थिताः श्रद्धालवः भावविभोराः अभवन्। सम्पूर्णे मन्दिर-परिसरे भक्तेः उल्लासस्य च अद्भुतं वातावरणं दृश्यते स्म।अस्मिन् अवसरे जन्माष्टमी-पूजायोजनसमित्याः स्वरूपशेखरपाण्डेयः, राजेशचौधरी, अर्चनाचौधरी इत्यादयः श्रद्धालवः उपस्थिताः आसन्।समित्याः स्वरूपशेखरपाण्डेयेन उक्तं यत् अत्र प्रतिदिनं भजन-कीर्तनस्य आयोजनं भवति। भगवान् श्रीकृष्णस्य षष्ठ्युत्सवपर्यन्तं जन्माष्टम्योत्सवस्य आयोजनं निरन्तरं भविष्यति।